
श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.11- द्वितीय सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥**
**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथैकादशोऽध्यायः ॥**

### श्रीभगवानुवाच

**बद्धो मुक्त इति व्याख्या, गुणतो मे न वस्तुतः ।**
**गुणस्य मायामूलत्वान्- न मे मोक्षो न बन्धनम् ॥ 1॥**

माया+ मूलत्+ वान्

**शोकमोहौ सुखं(म्) दुःखं(न्), देहापत्तिश्च मायया ।**
**स्वप्नो यथाऽऽत्मनः(ख्) ख्यातिः(स्), सं(म्)सृतिर्न तु वास्तवी ॥ 2॥**

देहापत्+ तिश्च , सं(म्)सृतिर्+ न

**विद्याविद्ये मम तनू , विद्ध्युद्धव शरीरिणाम् ।**
**मोक्षबन्धकरी आद्ये, मायया मे विनिर्मिते ॥ 3॥**

विद्+ ध्युद्+ धव

**एकस्यैव ममां(म्)शस्य, जीवस्यैव महामते ।**

**बन्धोऽस्याविद्ययानादिर्- विद्यया च तथेतरः ॥ 4॥**

बन्धोऽस्+ याविद्यया+ नादिर्

**अथ बद्धस्य मुक्तस्य, वैलक्षण्यं(वँ) वदामि ते ।**

**विरुद्धधर्मिणोस्तात, स्थितयोरेकधर्मिणि ॥ 5॥**

विरुद्ध+ धर्मिणोस्+ तात, स्थित+ योरे+ कधर्मिणि

**सुपर्णावेतौ सदृशौ सखायौ,**

**यदृच्छयैतौ कृतनीडौ च वृक्षे ।**

**एकस्तयोः(ख्) खादति पिप्पलान्न-**

**मन्यो निरन्नोऽपि बलेन भूयान् ॥ 6॥**

सुपर्णा+ वेतौ ,यदृच्+ छयैतौ ,पिप्+ पलान्+ न ,निरन्+ नोऽपि

**आत्मानमन्यं(ञ्) च स वेद विद्वा-**

**नपिप्पलादो न तु पिप्पलादः ।**

**योऽविद्यया युक् स तु नित्यबद्धो,**

**विद्यामयो यः(स्) स तु नित्यमुक्तः ॥ 7॥**

आत्मा+ नमन्यं(ञ्), नपिप्+ पलादो

**देहस्थोऽपि न देहस्थो, विद्वान् स्वप्नाद् यथोत्थितः ।**

**अदेहस्थोऽपि देहस्थः(ख्), कुमतिः(स्) स्वप्नदृग् यथा ॥ 8॥**

अदेहस्+ थोऽपि

**इन्द्रियैरिन्द्रियार्थेषु, गुणैरपि गुणेषु च ।**

**गृह्यमाणेष्वहं(ङ्)कुर्यान्- न विद्वान् यस्त्वविक्रियः ॥ 9॥**

इन्द्रियै+ रिन्द्रि+ यार्थेषु , गृह्य+ माणेष्+ वहं(ङ्)+ कुर्यान् , यस्त्व+ विक्रियः

**दैवाधीने शरीरेऽस्मिन्, गुणभाव्येन कर्मणा ।**

**वर्तमानोऽबुधस्तत्र, कर्तास्मीति निबद्ध्यते ॥ 10॥**

वर्तमानोऽ+ बुधस्+ तत्र, निबद्+ ध्यते

एवं(वँ) विरक्तः(श्) शयने, आसनाटनमज्जने ।

दर्शनस्पर्शनघ्राण- भोजनश्रवणादिषु ॥ 11॥

आसना+ टन+ मज्जने ,दर्शन+ स्पर्श+ नघ्राण ,भोजन+ श्रवणा+ दिषु

न तथा बद्ध्यते विद्वां(म्)स्- तत्र तत्रादयन् गुणान् ।

प्रकृतिस्थोऽप्यसं(म्)सक्तो, यथा खं(म्) सवितानिलः ॥ 12॥

प्रकृतिस्थोऽ+ प्यसं(म्)सक्तो

वैशारद्येक्षयासं(ङ्)ग- शितया छिन्नसं(म्)शयः ।

प्रतिबुद्ध इव स्वप्नान्- नानात्वाद् विनिवर्तते ॥ 13॥

वैशा+ रद्येक्षया+ सं(ङ्)ग , छिन्+ नसं(म्)शयः

यस्य स्युर्वीतसं(ङ्)कल्पाः(फ्), प्राणेन्द्रियमनोधियाम् ।

वृत्तयः(स्) स विनिर्मुक्तो, देहस्थोऽपि हि तद्गुणैः ॥ 14॥

स्युर्+ वीत+ सं(ङ्)कल्पाः(फ्) ,

प्राणेन्द्रिय+ मनोधियाम् ,देहस्+ थोऽपि

यस्यात्मा हिं(म्)स्यते हिं(म्)स्रैर्- येन किं(ञ्)चिद् यदृच्छया ।

अर्च्यते वा क्वचित्तत्र, न व्यतिक्रियते बुधः ॥ 15॥

हिं(म्)स्+ रैर् , क्वचित्+ तत्र , व्यति+ क्रियते

न स्तुवीत न निन्देत, कुर्वतः(स्) साध्वसाधु वा ।

वदतो गुणदोषाभ्यां(वँ), वर्जितः(स्) समदृङ्मुनिः ॥ 16॥

न कुर्यान्न वदेत् किं(ञ्)चिन्- न ध्यायेत् साध्वसाधु वा ।

आत्मारामोऽनया वृत्त्या, विचरेज्जडवन्मुनिः ॥ 17॥

साध्व+ साधु ,आत्मा+ रामोऽ+ नया , विचरेज्+ जड+ वन्मुनिः

शब्दब्रह्मणि निष्णातो, न निष्णायात् परे यदि ।

श्रमस्तस्य श्रमफलो, ह्यधेनुमिव रक्षतः ॥ 18॥

शब्द+ ब्रह्मणि, ह्यधे+ नुमिव

**गां(न्) दुग्धदोहामसतीं(ञ्) च भार्यां(न्),**

**देहं(म्) पराधीनमसत्प्रजां(ञ्) च ।**

**वित्तं(न्) त्वतीर्थीकृतमं(ङ्)ग वाचं(म्),**

**हीनां(म्) मया रक्षति दुःखदुःखी ॥ 19॥**

दुग्धदोहा+ मसतीं(ञ्) ,पराधी+ नमसत्+ प्रजां(ञ्) , त्वतीर्थी+ कृतमं(ङ्)ग

**यस्यां(न्) न मे पावनमं(ङ्)ग कर्म,**

**स्थित्युद्भवप्राणनिरोधमस्य ।**

**लीलावतारेप्सितजन्म वा स्याद्-**

**वन्ध्यां(ङ्) गिरं(न्) तां(म्) बिभृयान्न धीरः ॥ 20॥**

स्थित्युद्+ भवप्राण+ निरो+ धमस्य ,लीला+ वतारेप्+ सितजन्म

**एवं(ञ्) जिज्ञासयापोह्य, नानात्वभ्रममात्मनि ।**

**उपारमेत विरजं(म्), मनो मय्यर्प्य सर्वगे ॥ 21॥**

जिज्ञासया+ पोह्य , नानात्व+ भ्रम+ मात्मनि ,मय्यर्+ प्य

**यद्यनीशो धारयितुं(म्), मनो ब्रह्मणि निश्चलम् ।**

**मयि सर्वाणि कर्माणि, निरपेक्षः(स्) समाचर ॥ 22॥**

**श्रद्धालुर्मे कथाः(श्) शृण्वन्, सुभद्रा लोकपावनीः ।**

**गायन्ननुस्मरन् कर्म, जन्म चाभिनयन् मुहुः ॥ 23॥**

गायन्+ ननु+ स्मरन्

**मदर्थे धर्मकामार्था- नाचरन् मदपाश्रयः ।**

**लभते निश्चलां(म्) भक्तिं(म्), मय्युद्धव सनातने ॥ 24॥**

मय्युद्+ धव

**सत्सं(ङ्)गलब्धया भक्त्या , मयि मां(यँ) य उपासिता ।**

**स वै मे दर्शितं(म्) सद्भि- रं(ञ्)जसा विन्दते पदम् ॥ 25॥**

सत्सं(ङ्)ग+ लब्धया

**उद्धव उवाच**

**साधुस्तवोत्तमश्लोक, मतः(ख्) कीदृग्विधः(फ्) प्रभो ।**

**भक्तिस्त्वय्युपयुज्येत, कीदृशी सद्भिरादृता ॥ 26॥**

साधुस्+ तवोत्+ तमश्लोक , कीदृग्+ विधः(फ्) ,

भक्तिस्+ त्वय्युप+ युज्येत ,सद्+ भिरा+ दृता

**एतन्मे पुरुषाध्यक्ष, लोकाध्यक्ष जगत्प्रभो ।**

**प्रणतायानुरक्ताय, प्रपन्नाय च कथ्यताम् ॥ 27॥**

प्रणताया+ नुरक्ताय

**त्वं(म्) ब्रह्म परमं(वँ) व्योम, पुरुषः(फ्) प्रकृतेः(फ्) परः ।**

**अवतीर्णोऽसि भगवन्, स्वेच्छोपात्तपृथग्वपुः ॥ 28॥**

स्वेच्छो+ पात्+ तपृथग्+ वपुः

**श्रीभगवानुवाच**

**कृपालुरकृतद्रोहस्- तितिक्षुः(स्) सर्वदेहिनाम् ।**

**सत्यसारोऽनवद्यात्मा, समः(स्) सर्वोपकारकः ॥ 29॥**

कृपालु+ रकृत+ द्रोहस् ,

सत्यसारोऽ+ नवद्यात्मा ,सर्वो+ पकारकः

**कामैरहतधीर्दान्तो, मृदुः(श्) शुचिरकिं(ञ्)चनः ।**

**अनीहो मितभुक् शान्तः(स्), स्थिरो मच्छरणो मुनिः ॥ 30॥**

कामै+ रहतधीर्+ दान्तो , शुचि+ रकिं(ञ्)चनः

**अप्रमत्तो गभीरात्मा, धृतिमां(ञ्)जितषड्गुणः ।**

**अमानी मानदः(ख्) कल्पो, मैत्रः(ख्) कारुणिकः(ख्) कविः ॥ 31॥**

धृति+ मां(ञ्)जित+ षड्गुणः

**आज्ञायैवं(ङ्) गुणान् दोषान्, मयाऽऽदिष्टानपि स्वकान् ।**

**धर्मान् सन्त्यज्य यः(स्) सर्वान्, मां(म्) भजेत स सत्तमः ॥ 32॥**

मयाऽऽ+ दिष्टा+ नपि , सन्+ त्यज्य

**ज्ञात्वाज्ञात्वाथ ये वै मां(यँ), यावान् यश्चास्मि यादृशः ।**

**भजन्त्यनन्यभावेन, ते मे भक्ततमा मताः ॥ 33॥**

ज्ञात्वा+ ज्ञात्वा+ थ , यश्+ चास्मि ,भजन्त्य+ नन्य+ भावेन

**मल्लिङ्गमद्भक्तजन- दर्शनस्पर्शनार्चनम् ।**

**परिचर्या स्तुतिः(स्) प्रह्व- गुणकर्मानुकीर्तनम् ॥ 34॥**

मल्लिङ्+ गमद्+ भक्तजन ,दर्शन+ स्पर्श+ नार्चनम् , गुणकर्मा+ नुकीर्तनम्

**मत्कथाश्रवणे श्रद्धा, मदनुध्यानमुद्धव ।**

**सर्वलाभोपहरणं(न्), दास्येनात्मनिवेदनम् ॥ 35॥**

मदनुध्या+ नमुद्धव ,सर्वलाभो+ पहरणं(न्) ,दास्येनात्+ मनिवेदनम्

**मज्जन्मकर्मकथनं(म्), मम पर्वानुमोदनम् ।**

**गीतताण्डववादित्र- गोष्ठीभिर्मद्गृहोत्सवः ॥ 36॥**

मज्जन्म+ कर्मकथनं(म्) ,पर्वा+ नुमोदनम् ,

गीत+ ताण्डव+ वादित्र ,गोष्ठीभिर्+ मद्+ गृहोत्सवः

**यात्रा बलिविधानं(ञ्) च, सर्ववार्षिकपर्वसु ।**

**वैदिकी तान्त्रिकी दीक्षा, मदीयव्रतधारणम् ॥ 37॥**

सर्व+ वार्षि+ कपर्वसु ,मदी+ यव्रत+ धारणम्

**ममार्चास्थापने श्रद्धा, स्वतः(स्) सं(म्)हत्य चोद्यमः ।**

**उद्यानोपवनाक्रीड- पुरमन्दिरकर्मणि ॥ 38॥**

ममार्+ चास्थापने ,उद्यानो+ पवना+ क्रीड , पुरमन्दि+ रकर्मणि

**सम्मार्जनोपलेपाभ्यां(म्), सेकमण्डलवर्तनैः ।**

**गृहशुश्रूषणं(म्) मह्यं(न्), दासवद् यदमायया ॥ 39॥**

सम्मार्+ जनो+ पलेपाभ्यां(म्) , सेकमण्ड+ लवर्तनैः ,गृह+ शुश्रू+ षणं(म्)

**अमानित्वमदम्भित्वं(ङ्), कृतस्यापरिकीर्तनम् ।**

**अपि दीपावलोकं(म्) मे, नोपयुञ्ज्यान्निवेदितम् ॥ 40॥**

अमा+ नित्व+ मदम्+ भित्वं(ङ्) , कृतस्या+ परिकीर्तनम् , दीपा+ वलोकं(म्) ,नोप+ युञ्ज्यान्+ निवेदितम्

यद् यदिष्टतमं(लँ) लोके, यच्चातिप्रियमात्मनः ।
तत्तन्निवेदयेन्मह्यं(न्), तदानन्त्याय कल्पते ॥ 41॥

यच्चाति+ प्रिय+ मात्मनः ,तत् + तन्+ निवेद+ येन्+ मह्यं(न्) ,तदा+ नन्त्याय

सूर्योऽग्निर्ब्राह्मणो गावो, वैष्णवः(ख्) खं(म्) मरुज्जलम् ।
भूरात्मा सर्वभूतानि, भद्र पूजापदानि मे ॥ 42॥

सूर्योऽग्निर्+ ब्राह्मणो

सूर्ये तु विद्यया त्रय्या, हविषाग्नौ यजेत माम् ।
आतिथ्येन तु विप्राग्र्ये, गोष्वं(ङ्)ग यवसादिना ॥ 43॥

वैष्णवे बन्धुसत्कृत्या, हृदि खे ध्याननिष्ठया ।
वायौ मुख्यधिया तोये, द्रव्यैस्तोयपुरस्कृतैः ॥ 44॥

बन्धु+ सत्+ कृत्या ,ध्या+ ननिष्ठया ,द्रव्यैस्+ तोय+ पुरस्कृतैः

स्थण्डिले मन्त्रहृदयैर्- भोगैरात्मानमात्मनि ।
क्षेत्रज्ञं(म्) सर्वभूतेषु , समत्वेन यजेत माम् ॥ 45॥

भोगै+ रात्मा+ नमात्मनि

धिष्ण्येष्वेष्विति मद्रूपं(म्), शङ्खचक्रगदाम्बुजैः ।
युक्तं(ञ्) चतुर्भुजं(म्) शान्तं(न्), ध्यायन्नर्चेत् समाहितः ॥ 46॥

धिष्ण्येष्+ वेष्विति ,शङ्ख+ चक्र+ गदाम्बुजैः, ध्यायन्+ नर्चेत्+ समाहितः

इष्टापूर्तेन मामेवं(यँ), यो यजेत समाहितः ।
लभते मयि सद्भक्तिं(म्), मत्स्मृतिः(स्) साधुसेवया ॥ 47॥

प्रायेण भक्तियोगेन, सत्सं(ङ्)गेन विनोद्धव ।
नोपायो विद्यते सध्र्यङ्- प्रायणं(म्) हि सतामहम् ॥ 48॥
अथैतत् परमं(ङ्) गुह्यं(म्), शृण्वतो यदुनन्दन ।
सुगोप्यमपि वक्ष्यामि, त्वं(म्) मे भृत्यः(स्) सुहृत् सखा ॥ 49॥

सुगोप्+ यमपि

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)
संहितायामेकादशस्कन्धे एकादशोऽध्यायः ॥11॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

